# Thousand headed Man

Prof. VN Pandurangi

Karnataka Samskrit University Bengaluru

Purusastukta (Rgveda 1.90) is most important and most misinterpreted Sukta of Rgveda. Hence it is explained herein with a new insight from internal Vedic evidences.

This Sukta is revealed to Narayana Rsi. Who is this Narayana? This is the God Narayana himself. That is known from Mahabharata.[1]

---

[1] साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा। ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै॥ 12-349-64
साङ्ख्यस्य वक्ता कपिलः परमर्षिः स उच्यते। हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः॥ 12-349-65
अपान्तरतमाश्चैव देवाचार्यः स उच्यते। प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन॥ 12-349-66
उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः। उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः॥ 12-349-67
**पाञ्चरात्रस्य कृत्स्नस्य वेत्ता तु भगवान्स्वयम्। सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते॥ 12-349-68**
**यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः। न चैनमेवं जानन्ति तमोभूता विशाम्पते॥ 12-349-69**
तमेव शास्त्रकर्तारः प्रवदन्ति मनीषिणः। **निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम॥** 12-349-70
निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः। ससंशयान्हेतुबलान्नाध्यावसति माधवः॥ 12-349-71
पाञ्चरात्रविदो ये तु यथाक्रमपरा नृप। एकान्तभावोपगतास्ते हरिं प्रविशन्ति वै॥ 12-349-72
साङ्ख्यं च योगं च सनातने द्वे वेदाश्च सर्वे निखिलेन राजन्।
सर्वैः समस्तैर्ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणम्॥ 12-349-73
शुभाशुभं कर्म समीरितं यत्प्रवर्तते सर्वलोकेषु किञ्चित्।
तस्माद्दृषेस्तद्भवतीति विद्याद्दिव्यन्तरिक्षे भुवि चाप्सु चेति॥ 12-349-74
इति श्रीमहाभारते शान्तिपर्वणि मोक्षधर्मपर्वणि द्वैपायनोत्पत्तौ एकोनपञ्चाशदधिकत्रिशततमोऽध्यायः॥ 349 ॥
पञ्चाशदधिकत्रिशततमोऽध्यायः
मोक्षधर्मपर्व
नारायणीयम् ब्रह्मरुद्रसंवादः
जनमेजय उवाच
बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु। को ह्यत्र पुरुषः श्रेष्ठः को वा योनिरिहोच्यते॥ 12-350-1
वैशम्पायन उवाच
बहवः पुरुषा लोके साङ्ख्ययोगविचारणे। नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह॥ 12-350-2

We need to decide the nature of this Purusa. Is it a Man? Rgveda and other Vedas do not say so. Purusa is used with something special sense in mind while विशः मानुषः जनाः जनासः मनुष्य ना नरः etc. are used for the worldly men.

१,११४.१० आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।

१,१३३.०६ अवर्मह इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषां अद्रिवो घृणान्न भीषां अद्रिवः[2] ।

१,१३३.०६ शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे ।

१,१३३.०६ अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥

३,०३३.०८ एतद्वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगानि ।

३,०३३.०८ उक्थेषु कारो प्रति नो जुषस्व मा नो नि कः पुरुषत्रा नमस्ते ॥

४,०१२.०४ यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।

४,०१२.०४ कृधी ष्वस्मां अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥

४,०५४.०३ अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता ।

४,०५४.०३ देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥ This is a very good example to understand difference between Purusa and Maanusa both being available in one Rk.

५,०४८.०५ स जिह्वया चतुरनीक ऋञ्जते चारु वसानो वरुणो यतन्नरिम् ।

५,०४८.०५ न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम् ॥

७,०५७.०४ ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम ।

७,०५७.०४ मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥

---

बहूनां पुरुषाणां च यथैका योनिरुच्यते। तथा तं पुरुषं विश्वं व्याख्यास्यामि गुणाधिकम्॥ 12-350-3

नमस्कृत्वा च गुरवे व्यासाय विदितात्मने। तपोयुक्ताय दान्ताय वन्द्याय परमर्षये॥ 12-350-4

**इदं पुरुषसूक्तं हि सर्ववेदेषु पार्थिव। ऋतं सत्यं च विख्यातमृषिसिंहेन चिन्तितम्॥** 12-350-5

[2] This is a compound as well as पूरुष rather than पुरुष

७,०७५.०८ नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे ।

७,०७५.०८ मा नो बर्हिः पुरुषता निदे कर्यूयं पात स्वस्तिभिः सदा नः ॥

७,१०४.१५ अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥

१०,०१५.०६ आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।

१०,०१५.०६ मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥

१०,१६५.०३ शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ॥

खिले २,६.२ यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्।

खिले ४,६.३ तेन मां सूर्यत्वचमकरं पुरुषप्रियम्।

Here in All cases the word Purusa is found in compound or in Plural. That does not mean this Purusa Brahman.

१०,०५१.०८ प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वन्तं हविषो दत्त भागम् ।

१०,०५१.०८ घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥[3] (Commented upon in Niruktasamuccaya of Vararuci)

This is indicative of Brahman.

वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः परस्तात्। (४,११.९ ऋग्वेदखिले)

---

[3] ७,१०४.१५ अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।

१०,०९७.०४ सनेयमश्वं गां वास आत्मानं तव पूरुष ॥ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।

१०,०९७.०५ गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥

१०,१५५.०३ अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम् । These verses denote Puurusa. Hence do not relate with Purusa.

This is clearly indicative of Visnu. It connects with Taittiriya where Visnu is described in the same way as we see in the later part of this paper. Veda itself has clearly described this Purusa in Shatapatha as follows-

नियुक्तान्पुरुषान् ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिष्टौति सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्येतेन षोडशर्चेन (शतपथे १३.६.२.[१२])

There are many different Vedic usages and interpretations of word Purusa as follows-

अथ यस्मात्पुरुषमेधो नाम **इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषस्तस्य** यदेषु लोकेष्वन्नं तदस्यान्नम् मेधस्तद्यदस्यैतदन्नं मेधस्तस्मात्पुरुषमेधोऽथो यदस्मिन्मेध्यान्पुरुषानालभते तस्माद्वेव पुरुषमेधः (शतपथे १३.६.२.[१])

इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षीभूत्वा पुरः पुरुष आविशदिति स वा अयं **पुरुषः सर्वासु पूरुषु पुरि शयो नैनेन किञ्चनानावृतं नैनेन किञ्चनासंवृतम्** ॥ 18 ॥ (शतपथे बृहदारण्यकोपनिषदि १४.५.५.[१८])

**आत्मैवेदमग्र आसीत् पुरुषविधः** सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रेव्याहरत् ततोऽहंनामाभवत्तस्मादप्येतर्ह्या मन्त्रितोऽहमयमित्येवाग्र उक्त्वाथान्यन्नाम प्रब्रूते यदस्य भवति **स यत्पूर्वोऽस्मात् सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष** ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद (शतपथे १४.४.२.[१-२])
तस्माद्वै विद्वान् पुरुषमिदं पुण्डरीकमिति प्राण एष स पुरि शेते संपुरिशंत इति । पुरिशयं सन्तं प्राणं पुरुष इत्याचक्षते । (गोपथे ॥ १,१.३९ ॥)

स एतस्माज्जीवघनात् परात्परं **पुरिशयं पुरुषमीक्षते** । तदेतौ श्लोकौ भवतः ॥ 5॥ prashna

पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयन्त्यन्तरित्यन्तरपुरुषमभिप्रेत्य यस्मात्परं नापरमस्ति किंचिद्यस्मान्नणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्।।निरुक्त 2.3.1।।

Purusa = puri shaadah (one who sits in the pur), or puri shayah (one who sleeps in a city) or is derived from (the root) pr (to fill) i.e. he fills the interior, with reference to the inner soul. This entire (universe) is filled by that inner soul, to whom there is

nothing anterior, nothing subsequent, than who there is nothing more minute, nor more great, and immovable like a tree who alone lives in heaven (Lakshman sarup's translation MLBD 1998)

This is how Nirukta gives the meaning of word Purusa.

तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम् । इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तथ्सूर्यस्तदु चन्द्रमाः । तदेव शुक्रममृतं तद्ब्रह्म तदापस्स प्रजापतिः । **सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि** । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतवः संवथ्सरश्च कल्पन्ताम् । स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् । न तस्येशे कश्चन तस्य नाम महद्यशः ।।
तै.आ॥०।१०।१।२ ।।

य एषोऽन्तरादित्ये **हिरण्मयः पुरुषः** ।। तै.आ॥०।१०।१४।३१ ।। ।। १४ ।।

**एष पुरुष एष भूतानामधिपतिः** ।। तै.आ॥०।१०।१५।३२ ।। ।। १५ ।।

**अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः**। ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्। तै.आ॥०।१०।७१।९२ ।। ।। ७१।

**य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मात्मा..... स वा एष पुरुषः पञ्चधा पञ्चात्मा** येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगथ्स स भूतग्ं स भव्यं जिज्ञासक्लृप्त ऋतजा रयिष्ठाः  श्रद्धा सत्यो महस्वान्तपसोवरिष्ठाद्ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान्तस्मान्न्यासमेषां...... य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ।।तै. आ॥०।१०।७९।१०० ।।

**पुरुषं ह नारायणं** प्रजापतिरुवाच यजस्वयजस्वेति। स होवाच। यजस्वयजस्वेति वा त्वं मामात्थ। त्रिरयक्षि। (शतपथे १२.३.४)

मनोमयोऽयं पुरुषो  भाःसत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वैवमय**मन्तरात्मन्पुरुषः स एष सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः** सर्वमिदं प्रशास्ति यदिदं किं च य एवं वेद (शतपथे १४.८.८.)

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् .. 9..

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः .. 10..

महतः परमव्यक्तमव्यक्तात्पुरुषः परः। **पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः** .. 11.. katha:

**अङ्गुष्ठमात्रः पुरुषो** मध्य आत्मनि तिष्ठति। ईशानं भूतभव्यस्य न ततो विजुगुप्सते . एतद्वै तत् .. 12..

**अङ्गुष्ठमात्रः पुरुषो** ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः . एतद्वै तत् .. 13.. katha

**य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः .**

तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते . katha

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्। सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम् .. 7..

**अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च।**

**अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा** सदा जनानां हृदये संनिविष्टः।

तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति .. 17..

स एतस्माज्जीवघनात् परात्परं **पुरिशयं पुरुषमीक्षते** । तदेतौ श्लोकौ भवतः ॥ 5॥ prashna

**येनाक्षरं पुरुषं वेद सत्यं** प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ।।13।।

**दिव्यो ह्यमूर्तः पुरुषः** स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः ।।2।।

**पुरुष एवेदं विश्वं** कर्म तपो ब्रह्म परामृतम् । एतद् यो वेद निहितं गुहायां सोविद्याग्रन्थिं विकिरति ह सोम्य ।।10।। आथर्वणे

स वेदैतत् परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रम् । उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः ।।1।।

तथा विद्वान्नामरूपाद् विमुक्तः **परात् परं पुरुषमुपैति दिव्यम्** ।।8।। आथर्वणे

अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ ।। (मानवसंहिता ब.गो)

तं त्वौपनिषदं पुरुषं पृच्छामि (शतपथे बृहदारण्यके १४.६.९.[२८])

जगृहे पौरुषं रूपं भगवान्महदादिभिः। सम्भूतं षोडशकलमादौ लोकसिसृक्षया ॥ यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः। नाभिह्रदाम्बुजादासीद्ब्रह्मा विश्वसृजां पतिः॥ यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः। तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम्॥ पश्यन्त्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम्। सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ॥ (भागवते ०१.०३. १-४ ॥)

उदुत्तमं वरुणमित्यपां मन्त्रः प्रकीर्तितः। भूमेः पृथिव्यन्तरिक्षमिति वेदेषु पठ्यते॥ ९३.४२ ॥ सहस्रशीर्षा पुरुष इति विष्णोरुदाहृतः। इन्द्रायेन्दो मरुत्वत इति शक्रस्य शस्यते॥ ९३.४३ ॥ मात्स्ये पुरुषसूक्तस्य वैष्णवत्वमुक्तम्।

अहं नारायणो ब्रह्मन् सर्वभूतविनाशनः। अहं सहस्रशीर्षाख्यो यः पदैरभिसंज्ञितः॥ १६७.५० ॥ मात्स्ये[4]

तत्र यः परमात्मा हि स नित्यं निर्गुणः स्मृतः। स हि नारायणो ज्ञेयः सर्वात्मा पुरुषो हि सः॥ म.भा.12-351-14। न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा।।

आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता। पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः.॥ ऋग्विधाने ३.२९.(१५४ )

सहस्रशीर्षासूक्तं तु त्रिवारं च दिनेदिने। विष्ण्वादिसर्वदेवानां सर्वार्चनफलं लभेत्।। ऋ.वि. 34।।

Then how one can interpret Purusa as Man in the way interpreted by Jamison and host of others.

## Bibliography


ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बा संस्कृत सिरीस् आफीस् वाराणसी 1987

सर्वमूलग्रन्थाः सं.बन्नञ्जे गोविन्दाचार्यः, अखिलभारतमाध्वमहामण्डलम्, उडुपि, 1967-1980 (पञ्चसंपुटानि)


---

[4] Many verses quoted by Madhvacharya on Purusasukta shall also be read in this context. स हि पुरुषसूक्ताभिधेयः "यज्ञेन यज्ञमयजन्त' इति यज्ञशब्दात् । "यज्ञो विष्णुर्देवता' इति हि श्रुतिः ।
"तस्मिन् काले महाराज राम एवाभिधीयते । यथा हि पौरुषे सूक्ते विष्णुरेवाभिधीयते ।।' इति च स्कान्दे ।।26।।
(भूतादिपादव्यपदेशोपपत्तेश्चैवम् इति सूत्रे उदाहृतं वचनम्)
"हन्तैतमेव पुरुषं सर्वाणि नामान्यभिवदन्ति यथा नद्यस्स्यन्दमानाः समुद्रायणाः समुद्रमभिविशन्त्येवमेवैतानि नामानि सर्वाणि पुरुषमभिविशन्ति' (प्रकृत्यधिकरणे मध्वाचार्यकृतब्रह्मसूत्रभाष्ये उदाहृतवचनम्)
"चन्द्रमा मनसो जाश्चक्षोस्सूर्यो अजायत' इत्यादिना यः पुरुषाख्यो विष्णुरभिहितस्तद्विधमेवात्र "मूर्धैव सुतेजास्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा' इत्यादिनैनं वैश्वानरमधीयते । चशब्देन सकलवेदतन्त्रपुराणादिषु विष्णुपरत्वं पुरुषसूक्तस्य दर्शयति । तथा च ब्राह्मे- यथैव पौरुषं सूक्तं नित्यं विष्णुपरायणम् । तथैव मे मनो नित्यं भूयात् विष्णुपरायणम् ।। इति । चतुर्वेदशिखायां च - "सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् इति । एष ह्येवाचिन्त्यः परः परमो हरिरादिरनादिरनन्तोनन्तशीर्षोनन्ताक्षोनन्तबाहुरनन्तगुणोनन्तरूप' इति । बृहत्संहितायां च-
यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकम् । न तथा सर्ववेदाश्च वेदाङ्गानि च नारद ।। इत्यादि । (वैश्वानराधिकरणे मध्वाचार्यकृतब्रह्मसूत्रभाष्ये उदाहृतवचनानि)
सर्वतः पौरुषे सूक्ते गुणाः विष्णोरुदीरिताः । तत्रापि नैव सर्वेपि तस्मात् कार्योपसंहृतिः ।। इति ब्रह्मतर्के ।।25।। (पुरुषविद्यायामपि चेतरेषामनाम्नानात् इति सूत्रोदाहृतम्)

**ऋग्वेदसंहिता चौखम्बा संस्कृत सिरीस् आफीस् वाराणसी** 1977

**महाभारतम्, संपा. टि.आर् कृष्णाचार्यः कुम्भकोणम्,** 1897

Rigveda New translation by Stephanie Jamison, JB Brereton, OUP, NewYork 2014 (three volumes)